# संस्कृतकवितासङ्ग्रहे विद्यमानानां स्फुटकवितानां साहित्यिकं समीक्षणम्

महानन्दतिमिल्सिना, विद्यावारिधिः
सहप्राध्यापकः - साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः
timsinamahananda@gmail.com

https://doi.org/10.3126/ss.v3i03.83427

**लेखसारः**

संस्कृतवाङ्ग्यविकासे नैपालकानां संस्कृतकाव्यकृतीनां महती भूमिका वर्तते । सन्दर्भेऽस्मिन् जयतुसंस्कृतसंम् इत्याख्यया संस्थया प्रकाशिते संस्कृतकवितासङ्ग्रहस्य महद्योगदानं विद्यते । अत्र शताधिकानां नैपालकानां कवीनां संस्कृतभाषानिबद्धाः कविताः समाविष्टा सन्ति । सङ्ग्रहेऽस्मिन् विद्यमानाः कविताः संस्कृतभाषां प्रत्यनुरागमूलिकाः, राजनैतिकविसङ्गतिप्रकाशिकाः विशिष्टानां व्यक्तीनां प्रशंसायां केन्द्रिताः, भगवत्स्तुतिप्रधानाः, प्रकृतिचित्रणमूलिकाः, देशभक्तेर्भावान्विताः, दार्शनिकशास्त्रीयविषयसमन्विताः नीत्युपदेशे केन्द्रीभूताश्च विद्यन्ते । अत्र सङ्कलिता अधिकाः कविताः देशस्य विविधानां समस्यानां चित्रणे केन्द्रीभूताः प्राप्यन्ते । सङ्ग्रहेऽस्मिन्नाभ्यासिकानां परिपक्वानाञ्च कवीनां समुपस्थित्या कवितासु भाषाशैलीगतं वैविध्यं संलक्ष्यते । अत्र सङ्कलिताः कविताः विविधरसगुणालङ्कारैर्विभूषिताः प्राप्यन्ते । देशे विद्यमानां विविधां समस्यां निराकृत्यादर्शसमाजनिर्माणेऽत्रत्याः कविताः प्रेरणादायिन्यः सन्ति । अतोऽयं कवितासङ्ग्रहे संस्कृतकाव्यजगतः समुत्थानाय समुन्नतसमाजनिर्माणाय चोल्लेख्यो वर्तते । अस्मिन् लेखे रसालङ्कारादिविवेचनसामग्रीभिर्विवेचनपद्धतिमग्रे सारितमस्ति । गुणात्मिकायामनुसन्धान-पद्धत्यामाधारितेऽस्मिननुसन्धाने द्वितीयकस्रोतयुतानां सामग्रीणां संयोजनं वर्तते ।

**बीजशब्दाः** - अलङ्कारः, कवितासङ्ग्रहः, ध्वनिः, रसः ।

## विषयपरिचयः

विश्ववाङ्मये संस्कृतभाषा सकलभाषासु प्राचीना, समृद्धा, प्रसिद्धा, अमूल्यज्ञानराशिपरिपूर्णा च मन्यते । वैदिकलौकिकात्मकसंस्कृतभाषायामेव ज्ञानविज्ञानयोर्बहुमूल्यनिधयः संरक्षिताः सन्ति । अत एव संस्कृतसुरभारतीनिबद्धा वेदपुराणेतिहासनीतिशास्त्रधर्मशास्त्रज्यौतिषदर्शनसाहित्यादिविषयकाः ग्रन्थराशयो मानवसभ्यताया विकासाय कारकतत्त्वानि सन्ति । प्रचीनमहर्षित एव प्रवहणशीला संस्कृतकाव्यधारा अधुनातनपर्यन्तमपि तथैव प्रवहणशीला वर्तते । संस्कृतकाव्यरत्नानां कालिदास भारविमाघश्रीहर्षसदृशकाव्यपुरुषाणामूल्ययोगदानेन संस्कृतसाहित्यगरिमा विश्वसाहित्यशिखरे सर्वोत्कृष्टरूपेण चकास्ति । संस्कृतकाव्यजगति भरतमुनिभामहदण्डिरुद्रटमम्मटविश्वनाथ- जगन्नाथादिसुकवीनां योगदानमपि समुल्लेख्यं वर्तते । संस्कृतसाहित्यपरम्पराया धरातलेऽस्मिन्नाधुनिकनैपालीयसंस्कृतकवीनां योगदानमपि स्मरणीयं वर्तते । एतादृशेषु कविषु कुलचन्द्रगौतम–सोमनाथसिग्देल–दधिराममरासिनी–पूर्णप्रसादब्राह्मण–माधवप्रसाददेवकोटा–उमानाथपन्थी–हरिप्रसादाचार्य–भीमकान्तपन्थी–भरतराजमन्थलीय–टीकारामपन्थी–प्रभृतिभिर्विद्वदभिः समुल्लेख्यं योगदानं विहितम् । एतेषामेवाग्रजविदुषां सत्प्रेरणया प्रभावेण च वर्तमानकालिकेभ्यो नैपालकेभ्यः कविवरेभ्योऽपि काव्यरचनायै समुल्लेख्यं मार्गनिर्देशनं विहितं दृश्यते । नेपालदेशे २००४ विक्रमसम्वत्सरे संस्कृताध्ययनशीलैश्छात्रैः पाठ्यक्रमसुधाराय शिक्षाविरोधिराणाशासनप्रतिकाराय च 'जयतु संस्कृतम्' इति नाम्ना काष्ठमण्डपे आन्दोलनं विहितम् । नेपाले प्रजातन्त्रप्राप्तयेऽप्यस्याभियानस्य महत्त्वपूर्णं योगदानं मन्यते । इदमेव जयतु संस्कृतमित्यभियानं तत एव संस्थास्वरूपे समाबद्धीभूय संस्कृतग्रन्थसम्पादनप्रकाशने केन्द्रितभूतम् । जयतु संस्कृतम् इति संस्थया २०७० विक्रमवत्सरे सकलेषु ग्रन्थेषु पञ्चदशपुष्परूपेण, कवितासङ्ग्रहे च द्वितीयपुष्परूपेण संस्कृतकवितासङ्ग्रह इति ग्रन्थस्य सम्पादनं प्रकाशनञ्च विहितम् । अत्र तस्यैव ग्रन्थस्य समीक्षायै प्रयत्नं विहितमस्ति ।

## समस्याकथनम्

संस्कृतकवितासङ्ग्रहे विद्यमानानां स्फुटकवितानां साहित्यिकं समीक्षणम् इत्यस्मिन् लेखे निम्नाङ्किताः समस्याः समागताः सन्ति –

क. संस्कृतकवितासङ्ग्रहस्थासु कवितासु के के विषया प्रयुक्ताः सन्ति ?

ख. साहित्यिकदृष्ट्या संस्कृतकवितासङ्ग्रहस्थाः कविताः कीदृशाः वर्तन्ते ?

## उद्देश्यम्

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति –

क. संस्कृतकवितासङ्ग्रहस्थानां कवितानां विषयवस्तुसमीक्षणम्,

ख. संस्कृतकवितासङ्ग्रहस्थानां कवितानां साहित्यिकमुनशीलनम्,

## अध्ययनविधिः

एतदध्ययनं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति । अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । पौरस्त्यकाव्यशास्त्रिभिर्विरचितान्यलङ्कारसिद्धान्तसम्बद्धानि पुस्तकान्यप्यत्र सामग्रीरूपेण संयोजितानि विद्यन्ते । संस्कृतकवितासङ्ग्रहस्य भूमिकायां सन्निवेशितानां विषयाणामाधारेण च विश्लेषणं कृतमस्ति । सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति ।

## सीमा

संस्कृतकवितासङ्ग्रहे विद्यमानानां स्फुटकवितानां साहित्यिकं समीक्षणम् इति लेखे जयतु संस्कृतम् इति संस्थया २०७० तमे वैक्रमाब्दे प्रकाशिते संस्कृतकवितासङ्ग्रहस्य द्वितीयपुष्पे सङ्कलितानां महत्त्वपूर्णानां कवितानामेव साहित्यिकदृष्ट्या विश्लेषणं कृतं वर्तते । अस्मिन् कवितासङ्ग्रहे काव्यशास्त्रिभिः प्रतिपादिता नैका रसगुणालङ्कारा विद्यन्ते, परमत्रास्य सङ्ग्रहे विद्यमानानां प्रतिनिधिमूलकानां कवितानां साहित्यिकदृष्ट्या विवेचनं कृतमस्ति । कवितासङ्ग्रहे समाविष्टानां सकलानां कवितानामध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा विद्यते ।

## पूर्वकार्यसमीक्षा

संस्कृतकवितासङ्ग्रहे विद्यमानानां स्फुटकवितानां साहित्यिकं समीक्षणमिति विषयसम्बद्धानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयते –

मम्मटः काव्यप्रकाशः (ई.१९९४) इति स्वकीये काव्यशास्त्रविषयके लाक्षणिके ग्रन्थे कवितायाः काव्यस्य वा लक्षणं प्रस्तौति यत् – 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।' अस्यानुसारेण दोषरहितौ गुणान्वितौ शब्दार्थौ काव्यम् । एवञ्च क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः (पृ.१०) ।

विश्वनाथः 'साहित्यदर्पणः' (ई.१९९४) इति लाक्षणिके ग्रन्थे कवितायाः स्वरूपविषये कथयति यत् - वाक्यं रसात्मकं काव्यम् । अस्यानुसारेण रसात्मकं वाक्यमेव काव्यम् । रस एवात्मा साररूपतया जीवनाधायको यस्य, तेन विना तस्य काव्यत्वाऽभावस्य प्रतिपादितत्वात् । 'रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते (पृ.२४) ।

ऋषिरामपोख्रेलः 'संस्कृतकवितासङ्ग्रहः' (प्रथमपुष्पम्, २०५९) इत्यस्य सम्पादकीयम् इति शीर्षके कवितासङ्ग्रहे विद्यमानानां कवीतानां विवेचनं विदधाति - अत्राधुनातनीं राज्यशासनव्यवस्थामधिकृत्य रचिताः कविताः साम्प्रतमुच्चपदस्थानां भ्रष्टचरित्राणां प्रशासकानां सांसदानां च वाचालताम्, असत्यभाषिताम्, राष्ट्रियहितविरुद्धमाचरणम्, अर्थलोलुपताम्, जनेषु कृतघ्नताञ्च उद्घाटयन्ति । पुनस्तेषां कदाचारकदर्थनावशादेव महासङ्कटपतितानां जनतानां करुणक्रन्दनं लुण्ठितसर्वस्वाया नेपालभूमेर्विवशतां च द्योतयन्ति ।

नवराजकट्टेलः 'संस्कृतकवितासङ्ग्रहः' (द्वितीयपुष्पम्, २०७०) इत्यस्य 'संस्कृतकवितासङ्ग्रहस्थानां कवितानां समीक्षणम्' इति शीर्षके संस्कृतकवितासङ्ग्रहे सङ्कलितानां कवितानां विवेचनं विदधाति – संस्कृतकवितासङ्ग्रहे विविधभावविचारशैलीयुतानां कवितानां प्रस्तुतिर्विद्यते । दार्शनिक–धार्मिक–सांस्कृतिक–श्रृङ्गारिक–भक्तिपरक–प्रकृतिचित्रणयुतानां कवितानां राजनीतिकव्यङ्ग्यप्रधानानां कवितानाञ्च प्रस्तुत्या सङ्ग्रहोऽयमतीव गौरवास्पदं जातमित्यहं मन्ये । कतिपयकविभिर्हत्याहिंसातः क्षतविक्षतस्य नेपालस्य वर्णनं विहितम् । तैः कविभिः स्वकीयासु कवितासु आतङ्कदावानलान्नेपनलराष्ट्रं नेपालवासिनश्च समुद्धर्तुमाहूताः सन्ति जनाः । अस्या हिंसायाः श्रृङ्खला किमर्थम् ? कस्य हेतोः, कदापर्यन्तं प्रचलति हिंसारूपं दुष्कर्म ? इति कविभिः प्रश्ना उत्थापिता इति (पृ.२०१) ।

विष्णुप्रसादशर्मदेवकोटा 'संस्कृतकवितासङ्ग्रहः' (द्वितीयपुष्पम्, २०७०) इत्यस्य 'सम्पादनसन्दर्भः' इति शीर्षके संस्कृतकवितासङ्ग्रहे सङ्कलितानां कवितानां विषये प्रकाशनं विदधाति – अत्र चोच्चकोटिका मध्यमा सामान्याश्च कविताः सन्तीति पठनवेलायां ज्ञातं भविष्यति । एकस्य कवेरनेका अपि कविताः सन्ति । तत्र कवितायाः प्रथमशीर्षके कवेर्नाम वर्तते, नान्यासु । कविताशीर्षकाणि क, ख, ग इत्यादिरूपेण प्रत्तानि सन्ति । तत्र नाम्नः पुनरुक्तिर्न कृता । विभिन्नानां वर्षाणां कविगोष्ठ्याः कवितात्वेनापि ता अनेकाः सञ्जाताः । अनेकासां कवितानां कृते अनेकधन्यवादभाज एव ते । कृतेऽपि सम्पादने तत्र भाषिकी छान्दसी

भावात्मिका च न्यूनता दृश्येत एव । तत्र भाविन्यां कविगोष्ठ्यां प्रस्तुतये आगतासु कवितासु ता निराकृत्य आगमिष्यन्तीति आशास्यते (पृ.११)

'संस्कृतकवितासङ्ग्रहः' (द्वितीयपुष्पम्, २०७०) इत्यस्य 'प्रकाशनसन्दर्भः' इति शीर्षके संस्कृतकवितासङ्ग्रहप्रकाशनविषयसम्बद्धं विश्लेषणं कृतमस्ति । अत्र प्रकाशकः कथयति – अनेन संस्कृतकवितासङ्ग्रहेण सहृदयहृदयान्यावर्जितानि भविष्यन्ति, संस्कृते कवितालेखनप्रवृत्तिर्वर्धिता भविष्यति, तत्तत्क्षेत्रेषु वर्तमानानां विकृतीनां यथार्थताप्रदर्शनेन संस्कृतेऽत्र देशे विधेश्शासनं विद्वत्सम्मानं विविधानां विधानां विकासः संस्कृतलेखनपाटवञ्च संस्कृतक्षेत्रेषु सम्वर्धितं परिष्कृतञ्च भविष्यतीति आशास्यते । विदुषां कविवराणाञ्च कविताकर्म प्रभावि, मनोहारि उत्साहजनकञ्च भविष्यतीति (पृ.५) ।

पूर्वोक्तानां पूर्वकार्याणां समीक्षणेन ज्ञायते यत् जयतु संस्कृतम् संस्थया प्रकाशितस्य संस्कृतकवितासङ्ग्रहस्य द्वितीयपुष्पे विद्यमानानां कवितानां विषये विशदं विवेचनं कुत्रापि नैव दृश्यते । अतः शोधान्तरलमेतत् परिपूरणायेदमनुसन्धानमौचित्यपूर्णं भवतीति मन्यते ।

## विषयविश्लेषणम्

### कवितायाः स्वरूपम्

कविता संस्कृतसाहित्यस्य समृद्धा विधा वर्तते । कविशब्दे ताप्रत्ययं संयोज्य कविताशब्दो निष्पद्यते। कवते वर्णयतीति कविरिति व्युत्पत्त्या वर्णनकर्तारं पुरुषमेव कविरिति मन्यते । कविताशब्देन कविरचना कविकर्म वेत्यर्थोऽवगम्यते । विशेषेण तु कवीनां स्वकीयानुभूतिर्मनोभावना वा विविधच्छन्दःषु लयात्मकरूपेण सम्बद्धा साहित्यिकी रचना एव कवितेति कथ्यते । पूर्वीयसाहित्ये षष्ठशताब्दीयो भामहः शब्दार्थौ सहितौ काव्यम् इत्युक्त्वा कवितायां काव्ये वा शब्दार्थयोः सहभावमेव सर्वोत्कृष्टरूपेण महत्त्वमदात्। मम्मटस्तु तददोषौ शब्दार्थौ सगुणावनलङ्कृतिः पुनः क्वापि इति कथयन् दोषरहितगुणयुक्तं क्वचित्क्वचिदलङ्कारालङ्कृतं कविकर्म काव्यमित्यवोचत् । एवम् विश्वनाथः वाक्यं रसात्मकं काव्यम् इत्युक्त्वा काव्ये कवितायां वा रसात्मकं शब्दगुम्फनमेव प्राथमिकतां दत्तवान् । पाश्चात्यसाहित्ये हड्सनः कल्पनया मानसिकसंवेगेन च विहिता जीवनव्याख्या एव कविता मन्यते । संस्कृतकाव्यशास्त्रे संस्कृतभाषायां प्राकृताद्यपभ्रंशभाषायाञ्च निबद्धं काव्यं मुक्तकं, सन्दानितकं, विशेषकं, कलापकं, कुलकं, पर्यायबन्धः, परिकथा, खण्डकथा, सर्गबन्धः, अभिनेयार्थः, आख्यायिका, कथा इत्यादिविविधविधायां विभाजितं दृश्यते (आनन्दवर्धनः, २०११ : ३५३) । संस्कृतसाहित्ये पद्यकाव्यान्तर्गताः खण्डकाव्यमहाकाव्यादिविधाः

प्रसिद्धाः सन्ति । अन्यविधसाहित्यिकविधायामिव संस्कृतभाषायां मुक्तकं स्तुत्यात्मिकीं वा रचनां विहाय लघुकलेवरात्मककवितारचनपरम्परा बहुप्रचलिता विकसिता च नैव दृश्यते । नेपालीयकाव्यजगति तु लघु–लघुतम–मध्यम–बृहदात्मिक्य अपि रचनाः प्रसिद्धा एव सन्ति । लघुकलेवरात्मककवितायां शीर्षक–लय–भाव–बिम्बालङ्कार– भाषाशैल्यादितत्त्वानामौचित्यपूर्णरूपेण समावेशोऽपेक्षते ।

**संस्कृतकवितासङ्ग्रहस्य बाह्यसंरचना**

पुस्तकाकारकृतेर्बाह्यसंरचनायां पुस्तकस्यावरणम्, रचनम्, उट्टङ्कनम्, बन्धनम्, कर्गजस्वरूपम्, अक्षरस्वरूपम्, अक्षरान्तरम्, मूल्यम्, भूमिकालेखनमित्यादिविषयाः समागच्छन्ति । प्रस्तुतकवितासङ्ग्रहस्याग्रावरणपृष्ठे विपुलाकारकाक्षरे संस्कृतकवितासङ्ग्रहः इत्युल्लिख्य तदधः कोष्ठान्तरे द्वितीयं पुष्पं लिखितं वर्तते । तन्मध्यभागे एकस्मिन् पत्रस्थमृण्मयपात्रे विविधाकारकपुष्पाणां विकसितं मनोहरं दृश्यं प्रदर्शितमस्ति । कुसुमचित्रेणानेन कवितासङ्ग्रहेऽस्मिन् विविधकवीनां विविधाकारककवितात्मकरचनानां विकसितं प्रतिबिम्बमवगम्यते । प्लाष्टिकावरणं विधाय पीनकर्गजेन सज्जीकृतं रङ्गीनमावरणं प्रभावकारि आकर्षकञ्च दृश्यते । आवरणस्याधो भागे प्रकाशकः– जयतु संस्कृतमित्युल्लिख्य संस्थाया मुद्राङ्कनं विहितमस्ति । दक्षिणावरणपृष्ठे एकस्मिन् श्लोके संस्थाया समुद्देश्यं प्रस्तुतमस्ति, यत् –

जयतु संस्कृतं धर्मभूतये जयतु संस्कृतं लोकभूतये ।
जयतु संस्कृतं राष्ट्रभूतये जयतु संस्कृतं विश्वभूतये ।।

संस्थया इदानीं पर्यन्तं प्रकाशितानां ग्रन्थानां सूची प्रदर्शिता । तत्र च मङ्गलग्रहः (काव्यम्), कृष्णाभिसर्पणम् (काव्यम्), मीमांसातर्कभाषा, चन्द्रप्रभा (काव्यम्), संस्कृतकवितासङ्ग्रहः (प्रथमं पुष्पम्), कलमाक्षरचरितकाव्यम्, संस्कृतमा के छ ?, जयतु संस्कृतम् (मुखपत्रम्), प्राकृतपोखरा, लङ्कावतारसूत्रम्, चार्वाक्दर्शनम्, गौतमन्यायसूत्रम्, ब्रह्मसूत्रम्, जयतु संस्कृतम् (मुखपत्रम्), संस्कृतकवितासङ्ग्रहः (द्वितीयं पुष्पम्) इत्यादयः पञ्चदशग्रन्थाः समुल्लिखिताः सन्ति । मनोरमावरणपृष्ठस्यावलोकनेनापि पुस्तकमिदं पाठकान् पठनाय प्रेरयति । सम्पादनसन्दर्भे आवश्यकतातोऽप्यधिकविषयाणां प्रस्तुतीकरणं दृश्यते' पुस्तकमिदं एकाधिकशतसङ्ख्यक-कवीनामष्टचत्वारिंशदधिकशतसङ्ख्यककवितासमन्वितं चतुर्दशाधिकद्विशतपृष्ठात्मककलेवरे विस्तारितं च वर्तते। गुणस्तरीयकर्गजानां समावेशेन मुद्रणबन्धनयोः कलात्मकत्वेन च पुस्तकमिदं व्यवस्थितं दृश्यते ।

अत्राक्षराणां, शब्दानां, श्लोकानामान्तर्येण विहितो विन्यासः सान्दर्भिको दरीदृश्यते । एतादृशबाह्यविशेषताभिः पुस्तकमिदं गरिमामयं दृश्यते ।

**संस्कृतकवितासङ्ग्रहस्यान्तरिकी संरचना**

जयतु संस्कृतम् संस्थया २०७० विक्रमवत्सरे प्रकाशितायामस्यां संस्कृतकवितासङ्ग्रहे संस्कृतभाषानिबद्धाः १०१ कवीनां १४८ सङ्ख्यका लघ्वाकारकाः काश्चिच्च दीर्घाकारका अपि श्लोकैकात् एकपञ्चाशत्श्लोकात्मकाः कविताः समाविष्टाः सन्ति । शीर्षक–लयविधान–भावविधानालङ्कारविधानादीनामान्तरिकतत्त्वानामाधारेऽत्रत्याः कविता निम्नानुसारेण विश्लेष्यन्ते ।

***शीर्षकम्***

कवितानां नामैव शीर्षकं भवति, यच्च शब्दात्मकं पदावल्यात्मकं वाक्यात्मकं वा दृश्यते । शीर्षकञ्च कविताया मुख्यमाशयं व्यनक्ति । कवितासङ्ग्रहेऽस्मिन् ज्वलितम्, कथम्, सामयिकी, जीवनम्, सम्प्रतिः, चन्द्रः, वर्षा, सुप्रभातमित्यादीनि शब्दात्मकशीर्षकाणि, कविवरं कुलमणिं संस्मृत्य कालगतिः, विविधपद्यम्, सुरवाक्, शुभकामना, शिक्षां प्रति, बहुधर्मावलम्बिनी धरेत्यादीनि पदावल्यात्मकानि, शान्तिप्रियो भवतु नूतनवत्सरोऽयम्, सेव्यं सदा संस्कृतम्, वृथा गतं तस्य नरस्य जीवनम्, अयि भुवि मानवता कुत्र गता ? नमत रे मनुजाः सकलं खलम्, विभाति नेपालधरा इत्यादीनि वाक्यात्मकानि शीर्षकाणि सन्निहितानि सन्ति । कतिपयशीर्षकाणि च समस्यापूर्तिपरकाण्यपि समुपस्थापितानि ।

***छन्दसः प्रयोगः***

कविताया महत्त्वपूर्णं तत्त्वमेव छन्दः । कविता छन्दोयुक्ता छन्दोमुक्ता चेति द्विविधा भवति । छन्दोबद्धकवितायां वार्णिक–मातृकच्छन्दसां प्रयोगो भवति चेत् छन्दोमुक्तकवितायां स्वरव्यञ्जनवर्णानां साम्यवैषम्यरूपेण मेलनं पङ्क्तियोजनादिकञ्च विधाय कलात्मकवाचनविधानेन मनोहारित्वस्य समावेशो भवति। किन्त्वस्मिन् कवितासङ्ग्रहेऽधिकांशकविता वसन्ततिलका, शार्दूलविक्रीडितम्, शिखरिणी, द्रुतविलम्बितम्, अनुष्टुप्, उपजातिः, इन्दिरा, मन्दाक्रान्ता इत्यादिप्रसिद्धवार्णिकछन्दसि रचिताः सन्ति । एवं कमलरेग्मीमहोदयस्य पठत संस्कृतम्, हेमराजज्ञवालीमहोदयस्य आनन्दमयजीवनस्य रहस्यसूत्राणि, नवराजकट्टेलस्य अयि भुवि मानवता कुत्र गता ?, घनश्यामखतिवडामहोदयस्य अहं किंकर्तव्यविमूढो

जातः, विश्वनाथरूपाखेतीमहोदयस्य कस्य हानिर्वा, इत्यादिकविता गद्यलयमाध्यमेन समास्वद्यमानाः सन्ति। कवितायां प्रयुक्तानि छन्दांसि भावानुसारेणौचित्यरूपेण संयोजितानि दृश्यन्ते ।

**उद्देश्यम्**

कवेरनुभूतिसम्बन्धिदुःखसुखप्रेमोत्साहरूपसंवेगानां प्रतिबिम्बमेव कविताया उद्देश्यं भावो वा भवति। कविः स्वकवितामाध्यमेन मानवजीवनस्य जगतश्च कृते समुपयोगिनीं शिक्षां व्यावहारिकं सन्देशञ्च ददाति । कवितायां समाजस्य यथार्थतां प्रकाशयन् सत्यावश्यके सुधारकामनायाः सूक्ष्मसङ्केतः प्राप्यते । कवेः स्वच्छन्दतावादि–प्रगतिवादि–विसङ्गतिवाद्यस्तित्त्ववादिभावधाराः कवितायां मुखरिता भवन्ति । एतादृशविविधसमुद्देश्यानुसारेण भावानुसारेण च कवितासङ्ग्रहाभ्यन्तरेऽस्मिन् सन्निहिताः कविता निम्नानुसारेण वर्गीकृता भवन्ति ।

**संस्कृतप्रेम**

अस्मिन् कवितासङ्ग्रहेऽवस्थिताः कतिपयकविताः संस्कृतभाषां प्रत्यगाधप्रेमभावं प्रकटयन्ति । वर्तमानसन्दर्भे संस्कृतभाषां प्रति जनानामाकर्षणस्य न्यूनतायाः परिप्रेक्ष्ये कविभिः संस्कृतभाषाया गुणगरिमाभिवृद्धये महान् प्रयत्नो विहितो दृश्यते । कविष्वेतादृशेषु श्रीभद्रशर्मा, दुर्गाप्रसाददवाडी, सिद्धिनाथगौतमः, नारायणदत्तशास्त्री, खेमराजकेशवशरणः, कमलराजरेग्मी, टीकारामाधिकारी, रामहरिदाहालः, दुर्गाप्रसाददाहालः, हरिप्रसादगौतमः, श्रीरामसापकोटा इत्यादयः सन्ति । तत्र दुर्गाप्रसाददवाडीमहोदयेन संस्कृतभाषायाः सान्दर्भिकीं विशेषतां प्रकटयता गीतिलये सम्बोधनप्रधानकविता लिखितास्ति । सिद्धिनाथगौतमेनाधुना धर्मस्य, लोकस्य, नेपालजनन्याः, विश्वस्यैव वा कल्याणविरहात् जयतु संस्कृतम् आन्दोलनस्येदानीमपि लक्ष्यपूर्तेरभावः प्रदर्शितः । कविर्नारायणदत्तशास्त्री नेपालीभाषायाः संस्कृतेश्च रक्षायै संस्कृतस्यापरिहार्यतां प्रकाशयति । एवमेव कविः कमलराज रेग्मी विवेकहीनेऽस्मिन्नाधुनिकसमये संस्कृतभाषाया निरर्थकत्वभ्रमं विहाय महदास्थया महदाशया च पठितुं समाह्वानं कृतवान् । टीकारामाधिकारी संस्कृतभाषायाः काव्यकलया मनोहारित्वेन विविधज्ञाननिधित्वेन चेयं सर्वजनमनस्पर्शिणी भवेदिति ब्रुवन् संस्कृतं सर्वसामान्यभाषारूपेण प्रस्तुवन् कथयति यत्–

मगरलिम्बुतमाङ्जनादिषु गुरुङ्चौधरिक्षत्रियवर्णषु ।
विविधधार्मिकपर्वणि सौख्यदा भवतु सा सुरवाग्भुवि सुस्थिरा ।।

तथैव कवि दुर्गाप्रसाददाहाल इत्थं संस्कृतमहिमानं गायति –

ऋषिगणैस्तुतं वेदमूलकं सुरवरैर्नुतं सौष्ठवावहम् ।
बुधविशारदैः सादरं श्रुतं जयतु वाङ्मयं संस्कृतात्मकम् ।।

कविना रामचन्द्रगौतमेनास्माकं विविधसंस्काराणां समुत्सवानां, पर्वणां यागादिकर्मविधानानाञ्च संस्कृत एव विद्यमानत्वादस्या महत्त्वमत्युच्च वर्तत इति तथ्यं प्रकाशितम् । कविः श्रीरामसापकोटा पाखण्डेभ्यो धूर्तेभ्यश्च संस्कृतभाषायाः शास्त्रस्य च संरक्षणं विधाय धर्मस्य संस्कृतेश्चानवरतं सजीवत्वसम्पादनमस्माकं परमं कर्तव्यमित्यभिप्रायं प्रकटितवान् ।

एवमेवान्ये संस्कृतभाषाप्रेमिणः कवयो ध्रुवभट्टराई, दुर्गादत्तशर्मा, जनार्दन घिमिरे, विष्णुहरिपौडेलः, विश्वनाथरूपाखेती, शिवशङ्करन्यौपाने, हेमन्तराजार्यालः, नारायणराजभण्डारी, रोहिणिविलासलुइँटेल, नारायणप्रसादः शर्मकट्टेलः, दामोदरदाहालः, योगेश्वरबराल इत्यादयः सन्ति । कवि ध्रुवभट्टराई नेपालदेशे संस्कृतभाषाया आवश्यकता वर्तत इति कथयति, परन्त्वस्याः संरक्षणसंवर्धनयोर्विज्ञजनानां मौनत्वे स मनोदुःखं प्रकटितवान् । कविर्दुर्गादत्तशर्मा संस्कृतभाषायामनेकज्ञानराशीनां विद्यमानत्वेऽपि मूर्खेषु बोधाभावं प्रकाशयति चेत् जनार्दनघिमिरे अस्याः संरक्षणे सर्वैरप्येकीभावैर्भाव्यमित्याशयं प्रकटितवान् । कविना विष्णुहरिपौडेलेन स्वस्य संस्कृभाषाविस्मरणं प्रति चिन्ता प्रकटिता । एवमेव कविर्योगेश्वरबरालः संस्कृतभाषाया महत्त्वं वृत्त्यनुप्रसालङ्कारप्रयोगेणेत्थं परिचाययति –

भरतभारतं भट्टिभारवि सुकविभीरसास्वादनिर्मितम् ।
गणितयोगवेदान्तदर्शनं जयतु संस्कृतं विश्वमातरम् ।।

अनेन प्रकारेण विविधकविभिः कवितामाध्यमेन संस्कृतभाषां प्रति स्वकीयां महतीमास्थां समाजे अत्यावश्यकताञ्च द्योतयद्भिर्विविधशीर्षकेष्वात्मीया मनोभावनाः प्रकटिताः सन्ति ।

***राजनीतिगता विसङ्गतिः***

संस्कृतकवितासङ्ग्रहेऽस्मिन्नवस्थिताभिर्नैकाभिः कविताभिर्नेपाले दृश्यमानानां राजनैतिकास्तव्यस्ततायाः कारणेन समुत्पन्नानां समस्यानां विशदं चित्रणमपि विहितम् । नेपाले समुद्भूतमद्भुतं दशवर्षीयजनयुद्धस्य, विविधजनान्दोलनस्य यत्कारणेनोपलब्धानां लोकतन्त्र–गणतन्त्र–धर्मनिरपेक्षतादिसन्दर्भाणां विषयेऽपि कविभिर्व्यङ्ग्यात्मिकी भावना प्रस्तुता । लोकतन्त्रगणतन्त्रयोर्नाम्नि घटितानां घटायितानाञ्च हत्याहिंसान्दोलनापहरणचौर्यभ्रष्टाचारात्याचारादिविसङ्गतीनां कविभिर्विरोधो विहितः। देशे यादृश्यां व्यवस्थायां समागतायामपि सर्वदैव नेतृवर्गा लाभान्विता जाता, जनताश्चाहता

जाता। एतादृशानाममानवीयानां गतिविधीनां कारणेन जनतासु समुत्पन्नस्य नैराश्यस्य चैतद्वर्गीयकविताभिः समुत्कर्षरूपेण विरोधात्मकं रोषप्रदर्शनं विहितमस्ति । टीकारामपन्थिना नवनेपाल आगतः शीर्षकीयकवितायां वैदिकराज्यनेपालं धर्मनिरपेक्षरूपेण दुर्घोषणं कृत्वा लोकतन्त्रगणतन्त्रनाम्नि अराजकगर्जनं, ऐतिहासिकमूर्तीनां विस्फोटनं, शान्तिसुरक्षाविनाशनं विधाय स्वमेव विशिष्टनेतारं मन्यमानानां स्वयमेव हत्याहिंसायां प्रवर्तितानामुच्चपदस्थव्यक्तीनां दुर्गतिविधिं प्रति व्यङ्ग्यबाणप्रहारं विहितमस्ति । कविः शिवहरिमरहट्टा नेपालस्य गौरवरूपप्रियमित्रस्यापलापे चिन्तामनेन पद्यांशेन प्रकटयति–

स्वसभ्यतासंस्कृतिख्यापनेन तदार्षसन्देशप्रकाशनेन ।
मूलञ्च यद्राष्ट्रियचेतनायाः केनापि नीतं क्व च वा विलुप्तम् ।।

कविर्वेणीमाधवढकालः शान्तिश्चिरं रोदिति शीर्षकात्मिकायां कवितायां नेपालस्य दीनहीनावस्थाया यथार्थचित्रणं कुर्वन् युद्धगृहपतितं नेपालं प्रति दयां कर्तुं नेपालपुत्रान् समाह्वयति । टीकारामाधिकारी सीतेव खलैरपाकृता, मनुजैरासवभूः कृता भुवि इति कथयन् विपद्ग्रस्तायाः शोकाकुलायाश्च पृथिव्या यथार्थचित्रणं करोति । कविना रामहरिदाहालेन अहङ्कारिणः, स्वार्थिनः भ्रष्टाचारिणोऽपि पदप्रियान् नेतृवर्गान् प्रत्युत्तरापेक्षाशीर्षके तादृशदुष्कर्मकरणे समुत्तरमपेक्षितम् । कविर्यदुपन्थी स्वदेशस्य विपद्ग्रस्तविषमपरिस्थितेः कलात्मकरीत्यानया चित्रणं करोति–

रुदन्ति रात्र्यो दिवसा रुदन्ति, आकाशदिग्वायुप्रभा रुदन्ति ।
वन्याश्च ग्राम्याः पशवो रुदन्ति कथं निरुक् स्यान्मम मातृभूमिः ।।

एवमेव कवि रमेशखकुरेलो नायकौ प्रचण्डबाबुरामौ प्रति व्यङ्ग्यबाणं प्रहरन् कथयति–

एतौ दैत्यौ दैत्यसेनासमेतौ हिंसाकार्ये सज्जनानामुपेतौ ।
वह्निं दत्वा पुस्तकं दाहयन्ति भित्वा भङ्क्त्वा मन्दिरं नाशयन्ति ।।

कविर्हरिप्रसादशर्माचार्यो नेपाले प्रजातन्त्रस्य फलदायित्वासम्भवे कथम् इति शीर्षकीयकवितायां चिन्तां प्रकटयति । कविः ऋषिरामपोखेलः तत्र देशस्य का दशाशीर्षकीयस्वकीयकवितायां संविधाननिर्माणार्थं गतानां नेतृणामदूरदर्शित्वे तान् सव्यङ्ग्यं प्रहरति–

स्वस्वनेतृत्वलाभाय जातिभाषाविभाजने ।
राष्ट्रं विभज्यते तत्र प्रदेशस्य तु का दशा ।।

कविर्विष्णुप्रसाददेवकोटा इतो नव्यं किमीहसे, सामयिकी, विषमा स्थितिरत्र चित्रिता, नेपाले गणतन्त्रता इति कवितासु नवीनेऽस्मिन् नेपाले हत्या–हिंसा–प्रहरणादिदुष्कर्म धर्मसंस्कृतीनां समुपेक्षणमित्यादिदुरवस्थानामागमनमेव नवीनता वर्तत इति प्रकाशयन् नेपालस्य सन्दर्भे गणतन्त्रस्यासान्दर्भिकत्वमित्थं प्रकाशयति ।

कृषिप्रधानके देशे खाद्यान्नं दुर्लभं खलु ।
कार्पास-शर्कराभावो नेपाले गणतन्त्रता ।।

कविर्गोपालभण्डारी जनभावनामुपेक्ष्य जातिवादमाश्रयिणं लोकतन्त्रप्रणमामीति ब्रुवन् व्यङ्ग्यं प्रहरति। तथैव दुर्गाप्रसादार्यालो देशदशेति कवितायां – भ्रष्टाचारशोषणाख्यौ नेपालपरिचायकौ इति व्यङ्ग्यबाणं प्रहरति । कविर्नवराजकट्टेलः अयि भुवि मानवता कुत्रगता इति कविताामाध्यमेन नेपाले मानवताया अपलापे चिन्तां प्रकटयति । कविश्चन्द्रमणिनेपालः शान्ते एह्येहि कवितायां शान्तेः समाह्वानं करोति चेत् हे धूम निर्गच्छ रे कवितायां नेपाले प्रतिदिनमिव क्रियमानेनान्दोलनधूमेनातितरामाक्रान्तां दुरवस्थामपनेतुमाग्रहं करोति । कविर्हेमराजपौडेलः शठानां देशेऽस्मिन् विकटशठनीतिर्विजयते इति कथयन् देशे सबलन्यायिकशासनस्यावश्यकतां दर्शयति । कविर्हिमालय भट्टराईः नमत रे मनुजाः सकलं खलम्, राजनीति, लोकतन्त्रम्, कस्य त्यागं करिष्यति, इति शीर्षकान्वितासु कवितासु नेपालस्य नेतृणामसद्व्यवहारं प्रति तीक्ष्णव्यङ्ग्यबाणं प्रहरन् कथयति–

प्रचण्डं गिरिजां शेरं माकुनें यः स्मरिष्यति ।
नेपालभूतले तस्य सर्वोन्नतिर्भविष्यति ।।
श्रीसिंहवाहिनीं ध्यात्वा भवेत् कस्य पदोन्नति ?

एवमेव कविना भीमप्रसादखतिवडामहोदयेन देशस्य राजनीतिकावस्था याश्चित्रणमुखेन संस्कृतभाषायामपि गजलपरम्पराप्रचालने दृष्टान्तः प्रदर्शितश्चेत् कविना महानन्दतिमिल्सिनामहोदयेन कविता विलुप्ता कवितायां कलात्मकरीत्या देशस्य कारुणिकावस्थायाश्चित्रणं कृतमस्ति ।

***व्यक्तिप्रशंसनम्***

अस्मिन् कवितासङ्ग्रहे प्रस्तुताभिः कतिपयकविताभिः प्रभावकानां महत्त्वपूर्णव्यक्तीनां प्रशंसाविषयोऽपि स्पष्टीकृतः । भरतराजमन्थलीयेन कविवरं कुलमणिं संस्मृत्य शीर्षकीयकवितायां कविकुलमणेर्गुणस्य प्रशंसा विहितास्ति । एवमेव तीर्थराजदीक्षिताचार्येण गोस्वामितुलसीदासो

रामायणलेखनेनैव चिरञ्जीवीर्बभूवेति प्रतिपादितम् । तथैव कविना टीकारामाधिकारीमहोदयेन योगिनरहरिवन्दनाकवितायां योगिनं नरहरिनाथं प्रति गभीरश्रद्धाभावो प्रकटितः । कविर्दुर्गाप्रसाददाहालः षड्वैवात्मकः साइबाबास्तवः कवितायां साइबाबां प्रति कविगतश्रद्धाभावं प्रकटयति । एवमेव गणेशपाण्डेयमहोदयेन स्ववंशीयप्रसिद्धपूर्वजानां चरित्रचित्रणं कृतमस्ति । खेमरञ्जनभट्टराईमहोदयेन कौशिकीतटे प्राचीनहरिद्वारोपनामकचतराधामपरिचायकस्य बालसन्तमोहनशरणस्य स्तुतिप्रशंसा कृता ।

### *भगवत्स्तवनम्*

कवितासङ्ग्रहेऽस्मिन् सङ्कलिताभिः नैकाभिः कविताभिर्विविधदेवदेवीनां स्तुतिरपि विहिता अस्ति। एतादृशेषु स्तुतिपरेषु कविषु मध्ये टीकारामाधिकारीमहोदयेन जय जगदम्बे कवितायां जगदम्बिकाभगवत्याः स्तुतिर्विहिता चेत् हेमराजज्ञवालीकविना भगवद्बुद्धं प्रति भक्तिभावो प्रकटितः । कविना रामहरिदाहालेन वाणीवन्दनाकवितायां वाङ्मयस्वरूपायाः सरस्वत्याः स्तवनं कृतं चेत् हरिप्रसादाधिकारीकविना स्वकीयपशुपतिशीर्षकीयकवितायां शिवसरस्वत्योः स्तुतिर्विहिता । एवं कविना दुर्गाप्रसाददाहालेन भुक्तिमुक्तिप्रदातृगङ्गाया वन्दनं विहितं चेत् कविर्नवराजकट्टेलेन सीतां वन्दे इति कवितायां जनकपुत्र्याः सीतायाः स्तुतिगानं विहितम् । भरतभट्टराईकविना धरानस्य नारायणपुरनिवासिन्याः पञ्चकन्यादेव्याः सभक्तिभावं स्तुतिर्विहिता भगवत्स्तुतिप्रधानकवितारचयितृभिः कविभिर्विशेषतया शिव–देवी–विष्ण्वादिदेवतां प्रति कलात्मकरीत्यानन्यभक्तिभावार्पणं विहितं दृश्यते ।

### *प्रकृतिचित्रणं देशभक्तिश्च*

कवितासङ्ग्रहे सन्निहिताभिः कतिपयाभिः कविताभिः प्रकृतिचित्रणेन सह देशभक्तिभावश्च प्रदर्शितोऽस्ति । कविर्माधवभट्टराईमहोदयः अवनिसुषमाकवितायां नायिकासौन्दर्यभङ्ग्या नेपालभूमेर्वर्णनं करोति यथा –

मध्ये नितान्तरुचिरोर्वरवाटिकास्ति पार्श्वे निकुञ्जघनकाननपूर्णतास्ति ।
पादे सरित्सलिलसंप्लवचारुतास्ति सर्वत्र साधु सुषमामहिमा चकास्ति ।।

एवमेव कविना वेणीमाधवढकालेन नेपालकीर्तिकौमुदीकवितायां कालीगण्डकीनद्याः कलात्मकं चित्रणं विहितञ्चेत् गणेशपाण्डेयवल्कलेन सुवर्णखालकवितायां स्वकीयजन्मस्थलस्य स्वर्णिमप्रकृतेर्मनोहारिवर्णनं कृतमस्ति । वर्षाकवितायां कविर्नवराजकट्टेलः स्वयमेव वर्षारूपे परिणम्य सकलप्रकृत्यभिषेचने स्वकीयां मनोभिलाषामभिव्यनक्ति चेत् ‘वनमुपवनम्’ कवितायां प्राकृतिकछटाया

मनोहारिचित्रणं विदधाति । आनन्दघिमिरेकविः बहुधर्मावलम्बिनी धराकवितायां हिमशृङ्खलानां देशोऽयं नेपालोऽनेकजातीयैरनेकधर्मावलम्बिभिश्च जनैर्विभूषितोऽस्तीति विषयमालङ्कारिकरीत्याभिव्यनक्ति । कविरात्रेयो विष्णुराजः सुप्रभातम् कवितायामुत्प्रेक्षया सुन्दरप्रकृतेर्मनोरमं वर्णनमित्थं करोति–

किञ्चान्धकारेण विवृद्धवैरो, युयोध चन्द्रः प्रहरत्रयं हि ।
श्रान्तञ्च दृष्ट्वा मलिनं तमेव, युद्धाय सज्जोऽरुण एष किन्नु ।।

एवं कविर्बद्रिपोखेलः स्वकवितायां जलस्थलाटविदृष्ट्या सम्पन्ननेपालः परमात्मनः सुदृष्ट्यां प्राप्तायां त्वरितमेव विकसितो भवेदित्याशां करोति । कविर्गणेशतिमिल्सिना आह्वानम् इति कवितायां मम राष्ट्रं विना विश्वं व्यञ्जनं लवणं विना, इति ब्रुवन् नेपालस्य प्राकृतिकसौन्दर्यमहिमानमतिशयं स्तौति। इत्थं प्रकृतिचित्रणं कुर्वतीषु देशभक्तिभावं प्रकटयतीषु चान्यकवितासु सोमराजकट्टेलस्य वैष्णवो देश एषः जनार्दन घिमिरेमहोदयस्य विभाति नेपालधरा स्वकान्त्या घनश्यामखतिवडामहोदयस्य अहं किंकर्तव्यविमूढो जातः जनार्दनोपाध्यायस्य न खलु कान्तिपुरी रुचिरायिता रञ्जनसिग्देलस्य शान्त नेपालदेशः यज्ञराज रेग्मीमहोदयस्य मम ग्रामो रमणीयः कृष्णप्रसादन्यौपानेमहोदयस्य नेपालवन्दना टेकनाथघिमिरेमहोदयस्य नयपालदेशः इत्याद्याः सन्ति ।

*दार्शनिकं चिन्तनम्*

कवितासङ्ग्रहस्यास्य कतिपयकविताभिर्दार्शनिकस्य शास्त्रीयचिन्तनस्य च विषयोऽपि समाविष्टो दृश्यते। राधाकृष्णाधिकारी नामकवेः अभ्युदयनिः श्रेयसोः साधनं धर्मः इति कवितया धर्मस्य, मोक्षस्य, दानस्य च महिमप्रदर्शनमुखेन विस्तारपूर्वकं दार्शनिकचिन्तनं प्रकटितम् । डिल्लीप्रसादगौतमस्य यज्ञप्रार्थना यज्ञविवेचनञ्च कवितायां यज्ञमहिम्नः प्रस्तुतीकरणं धार्मिकोदधौ तलस्पर्शावगाहनञ्च विहितं दृश्यते चेत् कवेर्लोकनाथाचार्यस्य कालगतिः कवितायां कालस्य वशगाः सर्वे न कालः कस्यचिद् वशः इत्येवं सर्वविजयिकालस्य चित्रणं प्राप्यते । कवेस्तेजकेशर्युपाध्यायस्य पटमूर्खस्य गणितम् कवितायां प्रश्नोत्तरशैल्यां कविकलाकाराणां सर्वदैव सत्कला–सत्कृति– साधनादिसद्भावनानामेषणा भवतीति व्यक्तम् । कविना प्रह्लादपोख्रेलेन कविता शीर्षकीयकवितायां समावेशार्हकलात्मकतत्त्वानां चर्चा दृश्यते चेत् जीवनाधिकारीकविना जीवनकवितायां नेपालीगद्यकवितायाः शैलीमवलम्ब्य विविधभूमिकायामग्रेसर्तुं स्वजीवनस्य लक्ष्यं प्रदर्शितम् । एवमेव भीमप्रसादकण्डेलस्य चिद्विलासः शरद्कुमारभट्टराईमहोदयस्य अनुभूतिः, मुकेसमिश्रस्य कलौ मुद्रा, कोषराजन्यौपानेमहोदयस्य जीवनम्, पूर्णशङ्करगौतमस्य कोषवन्तः,

रामचन्द्रशर्मपौडेलस्य वैदिकी शुभाशंसा, पुरुषोत्तमखतिवडामहोदयस्य सूत्राक्षरी कविता इत्यादिभिर्बह्वीभिः कविताभिर्विविधविषयसम्बद्धस्य दार्शनिकचेतसः शास्त्रीयचैतन्यस्य च प्रकाशनं विहितम् ।

*नीतिशिक्षाप्रकाशनम्*

कवितासङ्ग्रहेऽस्मिन्नवस्थिताभिः कतिपयाभिः कविताभिर्नीतिसदुपदेशसन्दर्भा अपि समुपस्थापिताः सन्ति । कवेः खेमराजकेशवशरणस्य नीतिकाष्टकम् कवितया सर्वैरपि मानवीयकर्तव्यपालनमवश्यं कर्तव्यमिति मानवतावादिदृष्टिकोणं ध्वनितम् चेत् कविराजेश्वरदेवकोटामहोदयस्य चरैवेति वदन्ति किम् कवितायां सदाचारेण सुसंस्कारेण च युक्तं जीवनमेव समीचीनमिति सन्देशः प्राप्यते । कविर्घनश्यामकँडेलस्य मनो निरीक्षणम् कवितायां योग–समाधि–प्रज्ञादिभिर्मनोनियन्त्रणं कर्तव्यमिति सम्मतिः प्राप्यते चेत् नवराजकट्टेलस्य सा संस्कृतिः संस्कृतिः इति कवितायां देवपूजने, गुरुपितृगोसेवायां, अतिथिसत्कारे, देशप्रेमादिविविधसत्कर्मसु सर्वैरपि तल्लीनैर्भाव्यमिति प्रेरणा प्राप्यते । एवमेव कवे आचार्यस्य पूर्णचन्द्रढुङ्गेलस्य विविधपद्यम् विद्याकुमारीबज्राचार्यस्य योग एव मनुस्यस्य जीवनम् इत्यादिकविताभिर्मानवेभ्यो भक्तिभावयोगोपासनां प्रति च संलग्नाय सदुपदेशः प्रदत्तः संलक्ष्यते ।

*अलङ्कारवैविध्यम्*

काव्यस्य सौन्दर्यसर्जकं तत्त्वमेवालङ्कारोऽस्ति । एतदेव सौन्दर्यमलङ्कारः (वामनः, २०१० : ७) इत्यनेन स्पष्टीकृतम् । मानवानां कृते मुक्ताहार इव काव्येष्वनुप्रासोपमाद्यलङ्काराणि सन्तीति (मम्मटः, १९९४: ३८५) मम्मटोऽप्यकथयत् । अलङ्कारेण हि प्रतिपादितविषयवस्तूनि चमत्कारपूर्णानि भवन्ति । कवितासङ्ग्रहेऽस्मिन् सन्निहितासु कवितासु न तु प्रयत्नपूर्वकमपितु स्वाभाविकरूपेणौचित्यपूर्णरीत्या स्वतःस्फुर्तप्रतिभाद्वारा विविधालङ्काराणां सुसंयोजनं प्राप्यते । भरतराजमन्थलीयस्य ‘कुलमणिकुलमस्य कुलेऽव्रणो’ कवितांशे वृत्त्यनुप्रासस्य सकुशलः प्रयोगः प्राप्यते चेत् माधवभट्टराईमहोदयस्य अवनिसुषमाकवितायाः ‘सौभाग्यसम्पदिव राजति भूमिरत्र’ कवितांशे उपमालङ्कारस्य संयोजनम्, ‘आकर्षतीव सकलान् किमु मेलनाय’ इत्यंशे उत्प्रेक्षालङ्कारस्य प्रयोगः प्राप्यते । टीकारामाधिकारीवर्यस्य सुरवाक् शुभकामनाकविताया ‘सुवितता दयितावचनामृतैः’ कवितांशे रूपकालङ्कारस्य सान्दर्भिकं संयोजनं दृश्यते । वेणीमाधवढकालस्य नेपालकीर्तिकौमुदी कृष्णाकविताया ‘तरङ्गैरुत्तुङ्गैः स्पृशति जलधौ चुम्बति मुखम्’ कवितांशे समासोक्त्यलङ्कारश्चमत्कारी दृश्यते । एवमेव प्रह्लादपोख्रेलस्य कविता रूपकदृष्टान्ताद्यलङ्कारैर्विभूषिता दृश्यते ।

*रसध्वन्यादीनां प्रयोगः*

अस्मिन् कवितासङ्ग्रहे विद्यमानासु नैकासु कवितासु रसभावादीनां प्रयोगः प्राप्तुं शक्यते । विशेषतो हत्याहिंसाप्रताडितेनाहतमानसिकतायां शान्तिकामनायाः सन्दर्भे कविता प्रमुखरूपेण शान्तरसस्यानुभूतिमुपलब्धुं शक्यते । तथैव विविधप्रसङ्गे विहितस्तुतिपरासु कवितास्वपि शान्तरसस्यैवानुभूतिर्भवति । कतिपयासु कवितासु नेतृवर्गं प्रत्याक्रोशकारणेन रौद्ररसाभिव्यङ्ग्यः, कुत्रचिद् दुष्कर्मकारिभिर्दुष्टैः सह युद्धाय समुत्साहातिशयाभिव्यक्त्या कतिपयाः कविता वीररसाभिव्यञ्जनम्, युवतिसौन्दर्यचित्रणेन श्रृङ्गाररसस्य समुद्दीप्तिश्च दृश्यते । श्रृङ्गाररसप्रधानकवेर्नवराजकट्टेलस्य 'मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम्' मेदिनीनाथसुवेदीमहोदयस्य दृष्टियुद्धं बभूव, पीताम्बरनिरौलामहोदयस्य प्रियास्मरणम्, विष्णुराजस्यात्रेयस्य विनाप्रमुखाः सन्ति । तत्रात्रेयः श्रृङ्गारिकभावमनेनाभिव्यनक्ति–

अधरं विना सुरतिः कथं, विरतिः कथं सुरतं विना ।<br>
सुभगः कथं सुभगां विना, सुभगा कथं सुभगं विना ।।

एवमेव कतिपयासु कवितासु नेपालजनन्या दीनहीनावस्थायाश्चित्रणेन सहृदयहृदयेषु प्रवहत्यतिशयेन करुणरसोऽपि । कुत्रचिच्च कविताष्वसंलक्ष्यक्रमसंलक्ष्यक्रमरूपध्वनिरपि ध्वनिता प्राप्यते। एवमेवाधिकासु कवितासु स्वल्पसमासेनासमस्तपदप्रयोगबाहुल्येन च माधुर्यप्रसादगुणयोर्वैदर्भीपाञ्चालीरीत्योश्च प्रयोगाधिक्यं दृश्यते ।

*शैलीसौन्दर्यम्*

कवितासङ्ग्रहेऽस्मिन् विविधधरातलीयानां कवीनां कविताः प्राप्यन्ते । नवोदितानां, ख्यातिप्राप्तानां सिद्धहस्तानां, अभ्यासरतानां, प्राध्यापकानां, विद्यार्थिनां, प्राध्यापकेष्वपि संस्कृतानां संस्कृतेतराणां च, संस्कृतेऽपि साहित्यिकानां तदितराणाञ्च कवीनां समुपस्थितिर्दृश्यते । अनेन कवितासु भाषाशैलीगता विविधता स्वाभाविकी एव मन्यते । मूलतोऽधिकांशकवितानां भाषा सरसा, प्रवहणशीला, विशिष्टकलाकल्पनाभ्यां विभूषिता च प्राप्यते । अभिधात्मकलक्षणात्मक- व्यञ्जनात्मकत्रिविधाया एव शैल्याः प्रयोगः कवितासु द्रष्टुं शक्यते । विविधबिम्बालङ्कारप्रतीकादीनां प्रयोगेणाप्यत्रत्याः कविताः सुसज्जिता दृश्यन्ते । गद्यपद्यात्मिकायां शैल्यां लिखितासु कतिपयासु कवितासु वर्णनात्मिक्याः शैल्याः कतिपयासु च संवादात्मिक्याः शैल्याः प्रयोगो दृश्यते ।

## निष्कर्षः

जयतु संस्कृतम् इति संस्थया प्रकाशितस्यास्य कवितासङ्ग्रहस्य संस्कृतकवितापरम्परायां विशिष्टं स्थानं वर्तते । इदानीं विशेषतोऽस्माकं देशे दृष्टिपथसमागतां सामाजिकीमार्थिकीं, राजनीतिकीं, सांस्कृतिकीं, प्रशासनिकीञ्च विसङ्गतिं निर्मूलमुच्छिद्य स्वच्छसमाजनिर्माणायात्रत्याः कविताः प्रेरणायाः स्रोतांसि सन्ति । कतिपयाः कविता देशहितमवाञ्छन्तं नेतृवर्गं प्रति तीक्ष्णबाणस्वरूपा अपि सन्ति । संस्कृतभाषायामवस्थितानां ज्ञानविज्ञानखनीनामुज्जागरणायाप्यत्र विद्यमानाः कतिपयाः कविताः सफलीभूता दृश्यन्ते । संस्कृतभाषां प्रति जनरुचेरपेक्षितरूपेणाभिवृद्धेरभावस्येदानीन्तनस्यावस्थायां सङ्ख्यात्मकेन गुणात्मकेन च रूपेणैतादृशीनां कवितानां समुदयेन संस्कृतभाषागरिम्णोऽभिवृद्धिरनुभूयते । संस्कृतभाषायां लघुकवितालेखनपरम्परायां सङ्ग्रहोऽयं संस्कृतानुरागिणां कृते वरदानमेव । विश्वविद्यालयस्तरीये विद्यालयस्तरीये च पाठ्यक्रमे सङ्ग्रहस्यास्य गुणस्तरीयकवितासमावेशपूर्वकं संस्कृतभाषाशिक्षणे विहिते विद्यार्थिनोऽपि निश्चयमेव लाभान्विता भवन्तीति ।

## सन्दर्भसामग्रीविवरणम्


आनन्दवर्धनः (ई. २०११), *ध्वन्यालोकः* (व्याख्या–जगन्नाथपाठकः), चौखम्बा विद्याभवनम् ।

त्रिपाठी, वासुदेव अन्ये च (२०५३), *नेपाली कविता* (भाग – ४ ), साझा प्रकाशनम् ।

देवकोटा, विष्णुप्रसादशर्मा अन्ये च (सम्पा.), (२०७०), *संस्कृतकवितासङ्ग्रहः,* (द्वितीयपुष्पम्), जयतु संस्कृतम् ।

पोख्रेलः, ऋषिरामः (सम्पा.), (२०५९), *संस्कृतकवितासङ्ग्रहः* (प्र.पुष्पम्), जयतु संस्कृतम् ।

मम्मटः, (ई. १९९४), *काव्यप्रकाशः* (व्याख्या–वासुदेवशास्त्री), चौखम्बा विद्याभवनम् ।

वामनः, (ई. १९१०), *काव्यालङ्कारसूत्रवृत्तिः,* चौखम्बा कृष्णदास अकादमी ।

विश्वनाथः, (ई.१९९४), *साहित्यदर्पणम्,* कृष्णदास अकादमी ।